द्वादशादित्य ध्यान श्लोकालु

द्वादशादित्य ध्यान श्लोकालु

1। धाता –

धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने |
पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ||
धाता शुभस्य मे दाता भूयो भूयोऽपि भूयसः |
रश्मिजालसमाश्लिष्टः तमस्तोमविनाशनः ||

2। अर्यम –

अर्यमा पुलहोऽथौजाः प्रहेति पुंजिकस्थली |
नारदः कच्छनीरश्च नयंत्येते स्म माधवं ||
मेरुशृंगांतरचरः कमलाकरबांधवः |
अर्यमा तु सदा भूत्यै भूयस्यै प्रणतस्य मे ||

3। मित्रः –

मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहः |
रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ||
निशानिवारणपटुः उदयाद्रिकृताश्रयः |
मित्रोऽस्तु मम मोदाय तमस्तोमविनाशनः ||

4। वरुणः –

वसिष्ठो ह्यरुणो रंभा सहजन्यस्तथा हुहुः |
शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी ||
सूर्यस्यंदनमारूढ अर्चिर्माली प्रतापवान् |
कालभूतः कामरूपो ह्यरुणः सेव्यते मया ||

5। इंद्रः –

इंद्रो विश्वावसुः श्रोता एलापत्रस्तथाऽंगिराः |
प्रम्लोचा राक्षसोवर्यो नभोमासं नयंत्यमी ||
सहस्ररश्मिसंवीतं इंद्रं वरदमाश्रये |
शिरसा प्रणमाम्यद्य श्रेयो वृद्धिप्रदायकं ||

6। विवस्वान् –

विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः |
अनुम्लोचाः शंखपालो नभस्याख्यं नयंत्यमी ||
जगन्निर्माणकर्तारं सर्वदिग्व्याप्ततेजसं |
नभोग्रहमहादीपं विवस्वंतं नमाम्यहं ||

7। त्वष्टा –

त्वष्टा ऋचीकतनयः कंबळाख्यस्तिलोत्तमा |
ब्रह्मापेतोऽथ शतजित् धृतराष्ट्र इषंभरा ||
त्वष्टा शुभाय मे भूयात् शिष्टावळिनिषेवितः |
नानाशिल्पकरो नानाधातुरूपः प्रभाकरः |

8। विष्णुः –

विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् |
विश्वामित्रो मखापेत ऊर्जमासं नयंत्यमी ||
भानुमंडलमध्यस्थं वेदत्रयनिषेवितं |
गायत्रीप्रतिपाद्यं तं विष्णुं भक्त्या नमाम्यहं ||

9। अंशुमन् –

अथांशुः कश्यपस्ताक्ष्य ऋतसेनस्तथोर्वशी |
विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी ||
सदा विद्रावणरतो जगन्मंगळदीपकः |
मुनींद्रनिवहस्तुत्यो भूतिदोऽंशुर्भवेन्मम ||

10। भगः –

भगः स्फूर्जोऽरिष्टनेमिः ऊर्ण आयुश्च पंचमः |
कर्कोटकः पूर्वचित्तिः पौषमासं नयंत्यमी ||
तिथि मास ऋतूनां च वत्सराऽयनयोरपि |
घटिकानां च यः कर्ता भगो भाग्यप्रदोऽस्तु मे ||

11। पूष –

पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा |
घृताची गौतमश्चेति तपोमासं नयंत्यमी |
पूषा तोषाय मे भूयात् सर्वपापाऽपनोदनात् |
सहस्रकरसंवीतः समस्ताशांतरांतरः ||

12। पर्जन्यः –

क्रतुर्वार्चा भरद्वाजः पर्जन्यः सेनजित् तथा |
विश्वश्चैरावतश्चैव तपस्याख्यं नयंत्यमी ||
प्रपंचं प्रतपन् भूयो वृष्टिभिर्मादयन् पुनः |
जगदानंदजनकः पर्जन्यः पूज्यते मया ||

ध्यायेस्सदा सवितृमंडलमध्यवर्ती
नारायणस्सरसिजासन सन्निविष्टः|
केयूरवान् मकरकुंडलवान् किरीटी
हारी हिरण्मयवपुः धृतशंखचक्रः ||